# 2019

# Part – II

# SANSKRIT

# (General )

# Paper – II

*Full Marks – 90*

*Time : 3 Hours*

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. कस्यापि एकस्योत्तरं प्रदेयम् : 10

যে কোনো একটি প্রশ্নের উত্তর দাও ঃ

(क) मित्रलाभस्य प्रस्तावनांशे आलोचितं विद्यामाहात्म्यम् आलोच्यताम् ।

মিত্রলাভের প্রস্তাবনাংশে আলোচিত বিদ্যামাহাত্ম্য আলোচনা কর।

(ख) गृध्रमार्जारकथायाः सारवस्तु आलोचनीयम् ।

গৃধ্রমার্জারকথার সারবস্তু আলোচনা কর।

2. सप्रसङ्ग व्याख्या कार्या : 6

সপ্রসঙ্গ ব্যাখ্যা কর ঃ

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ।।

*अथवा*

आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि।।

3. कस्यापि प्रश्नद्वयस्योत्तरं दातव्यं निम्नलिखितेषु प्रश्नेषु : 2×2

নিম্নলিখিত প্রশ্নগুলির মধ্যে যে কোনো দুটির উত্তর দাও ঃ

(क) केषां विश्वासो नैव कर्तव्यः ?

কাদের বিশ্বাস করা উচিৎ নয় ?

(ख) कीदृशजनाः दुःखभागिनो भवन्ति?

কারা দুঃখভাগী হন?

(ग) महात्मनां प्रकृतिसिद्धाः गुणाः के?

কোন গুণগুলি মহাত্মাদের প্রকৃতিসিদ্ধ?

(घ) पुरुषेण हातव्या दोषाः के?

পুরুষের কোন দোষগুলি বর্জন করা উচিৎ?

4. निम्नलिखितेषु द्वयोरुत्तरं प्रदेयम् : 12×2

নিম্নলিখিত যে কোনো দুটি প্রশ্নের উত্তর দাও ঃ

(क) 'अभिज्ञानशकुन्तलम्' इति नाटकमवलम्ब्य विदूषकस्य चरित्रचित्रणं कार्यम्।

'অভিজ্ঞানশকুন্তলম্'–নাটকানুসারে বিদূষকের চরিত্র চিত্রণ কর।

(ख) 'अवतु वस्ताभिरष्टाभिरीशः'–अत्र आलोचितानां शिवस्य अष्टानां वपुषां वर्णनं क्रियताम् ।

উপরি উক্ত উক্তিটিতে শিবের যে আটটি তনুর কথা বলা হয়েছে তাদের স্বরূপ বর্ণনা কর।

(ग) शकुन्तलायाः पतिगृहगमनवृन्तान्तः सविशदं वर्ण्यताम् ।

শকুন্তলার পতিগৃহগমন বৃত্তান্ত বিশদে আলেচনা কর।

(घ) तपोवने हस्तिप्रवेशस्य किं तात्पर्यं वैशद्येन आलोच्यताम्।

তপোবনে হস্তিপ্রবেশের তাৎপর্য বিশদে বর্ণনা কর।

5. सप्रसङ्गं यथेच्छमेकस्य व्याख्या कार्या : 7×1

সপ্রসঙ্গ যে কোন একটির ব্যাখ্যা কর ঃ

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

(ख) कृष्णसारे ददच्चक्षुस्त्वयि चाधिक्यकार्मुके
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम्।।

6. कस्याप्येकस्याशयः स्पष्टीक्रियताम् : 4×1

যে কোনো একটির আশয় স্পষ্ট কর ঃ

(क) अहो कामी स्वतां पश्यति

(ख) अर्थो हि कन्या परकीय एव

7. निम्नलिखितप्रश्नेषु यथेच्छं प्रश्नपञ्चकस्योत्तरं प्रदेयम् : 2×5

নিম্নলিখিত প্রশ্নগুলির মধ্যে যে কোন পাঁচটি প্রশ্নের উত্তর দাও ঃ

(क) अभिज्ञानशकुन्तलम् केन रचितम् ? तत्र च कति अङ्काः ?

'অভিজ্ঞানশকুন্তলম্' কার রচিত ? সেখানে কয়টি অঙ্ক ?

(ख) शकुन्तलायाः सखीद्वयस्य नाम लेख्यम् ।

শকুন্তলার সখীদ্বয়ের নাম লেখ ।

(ग) 'न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्' एतत्कस्योक्तिः ? कं प्रति च ?

উপরি উক্ত রচনাটি কার এবং কার প্রতি ?

(घ) दुर्वासाः शुकुन्तलायै कीदृशं शापं दत्तवान् ?

দুর্বাসা মুনি শকুন্তলাকে কী শাপ দিয়েছিলেন ?

(ङ) दुष्यन्तः शकुन्तलां केन विधिना परिणीतवान् ?

দুষ্যন্ত শকুন্তলাকে কোন বিধিতে বিবাহ করেছিলেন ?

(च) शकुन्तलायाः प्रतिगृहगमनवृन्तान्तः कस्मिन अङ्के विद्यते? गमनकाले च शकुन्तलया सह के आसन् ?

শকুন্তলার পতিগৃহগমনবৃত্তান্ত কোন অঙ্কে উল্লিখিত ? গমনকালে শকুন্তলার সাথে কারা ছিলেন ?

(छ) 'आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्' कमुद्दिश्य कस्य वचनमिदम् ?

উপরি উক্ত রচনাটি কার এবং কাকে উদ্দেশ্য করে রচিত?

8. यथेच्छं द्वयस्य सोदाहरणं व्याख्या कार्या : 5×2

নিম্নলিখিত যে কোনো দুটির উদাহরণসহ ব্যাখ্যা কর ঃ

इन्द्रवज्रा, वसन्ततिलकम्, शालिनी, भुजङ्गप्रयातम्

9. यथेच्छं श्लोकचरणद्वयस्य यतिप्रदर्शनपूर्वकं गणविन्यासं च कृत्वा छन्दोनिर्णयः कार्यः $2\frac{1}{2}\times 2$

যে কোনো দুইটি শ্লোকচরণের যতিপ্রদর্শনপূর্বক গণবিন্যাস করে ছন্দোনির্ণয় কর ঃ

(क) ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः

(ख) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्

(ग) न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्

(घ) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति

10. निम्नलिखितं गद्यांशं पठित्वा समेषां प्रश्नानाम् उत्तराणि सरलसंस्कृत भाषया देवनागरीलिप्या च लेख्यानि :

নিম্নলিখিত গদ্যাংশটি পড়ে সমস্ত প্রশ্নের উত্তর সরল সংস্কৃত ভাষায় ও দেবনাগরী লিপিতে লেখ ঃ

आसीत् कस्मिंश्चित्समुद्रोपकण्ठे विशालः जम्बुपादपः। तत्र रक्तमुखो नाम वानरः प्रतिवसति स्म। स प्रत्यहं सुपक्वानि जम्बुफलानि खादति स्म। एकदा करालमुखी नाम मकरः समुद्रसलिलादुत्थाय तस्य वृक्षस्याधः आगतः। ततो रक्तमुखस्त-मवदत् भो त्वं मम अतिथिः। भक्षयतु मया दत्तानि अमृत-तुल्यानि जम्बुफलनि। एवमुक्त्वा तस्मै जम्बुफलानि अयच्छत्।

सोऽपि मकरः तानि भक्षयित्वा स्वगृहं गतः। एकदा मकरः जम्बुफलानि गृहं नीत्वा भार्यायै प्रायच्छत् । सापि तानि भक्षयित्वा परमानन्दं प्राप्तवती । सा अवदत् 'यः सदैव ईदृशानि अमृतफलानि भक्षयति तस्य हृदयममृतमयं भवति । तस्य हृदयमहं भक्षयिष्यामि इति।

स प्राह भद्रे मैवं वद। यतः सोऽस्माकं परमसुहृत् । तच्छ्रुत्वा मकरो उक्तवती-'यदि भार्यया ते प्रयोजनमस्ति तर्हि तस्य हृदयं मह्यं यच्छतु, अन्यथा प्राणान् त्यक्ष्यामि' इति ।

तस्या अनुरोधेन मकरो वानरमामन्त्रितवान् वानरोऽवदत्-'मित्र अवश्यमेव गमिष्यामि। परं जलाभ्यन्तेर तव गृहं, स्थलचरोऽहं कथं तत्र गन्तुं समर्थो भविष्यामि?' इति । तदा मकरोऽवदत्- मम पृष्टमारूह्य गमिष्यसि इति।
वानरं पृष्ठे नीत्वा समुद्रस्य मध्यभागमागम्य मकरोऽवदत्-'मित्र इष्टदेवतां स्मर। भार्या मे अमृतमयं तव हृदयं भक्षयितुमिच्छति' इति ।

अथ प्रत्युत्पन्नमति-र्वानर उक्तवान्-सखे यदि हृदयेन में तव प्रयोजनं तर्हि पूर्व कथं नावदः? यतः अमृतमयं मम हृदयं सदैव जम्बुकोटरे सुगुप्तं रक्षामि शीघ्रं तत्र चल। तुभ्यं हृत्पिण्डं दास्यामि

इति। तौ तदा प्रत्यागतवन्तौ । वानरोऽपि द्रुतं जम्बुपादपमारूह्य मकरमवदत्-धिक् धिक् मूर्ख । कस्यापि हृत्पिण्डं देहाद् बहिः न तिष्ठति त्वं गच्छ पुनरत्र नागमिष्यसि इति ।

(क) जम्बुपादपः कुत्र आसीत्? तत्र कः निवसति स्म ? $2\frac{1}{2}$

(ख) जम्बुफलानि भक्षयित्वा मकरपत्नी किम् उक्तवती ? $2\frac{1}{2}$

(ग) मकरस्य नाम किम् आसीत् ? स कथं वानरम् आमन्त्रितवान् ? $2\frac{1}{2}$

(घ) केन प्रकारेण स्वप्राणान् मकरात् रक्षितवान् वानरः? $2\frac{1}{2}$

---